"ततः श्राद्धमशुद्धौ तु कुर्य्यादेकादशे तथा ।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः" ॥
इति ।
"शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयोः ।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति" ॥
इति च शुद्धितत्त्वं ॥ (वर्णाद्यशुद्धियुक्तः ।)

**अशुभं**, क्ली, (न शुभम् । नञ्तत्पुरुषः । नास्ति शुभं यस्येति समासे वाच्यलिङ्ग एव ।) पापं । इति हेमचन्द्रः ॥ अमङ्गलं ।
("न च किञ्चिदुवाचैनं शुभं वा यदि वाशुभम्" ।
मा च वोऽस्त्वशुभं किञ्चित्सर्व्वथा पाण्डुनन्दनाः" ॥
इति च भारते ॥) तद्युक्ते त्रि । यथा,—
"सर्व्वाशुभानां परिमोक्षकारि
सम्पूजनं देववरस्य विष्णोः" ।
इति ज्योतिस्तत्त्वं ॥ अपि च । मदनपारिजातधृतं ।
"अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनं ।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः" ॥
इति तिथ्यादितत्त्वं ॥

**अशून्यशयनव्रतं**, क्ली, (न शून्यं शयनं यस्मात्, तत् व्रतम् ।) श्रावणकृष्णद्वितीयाकर्त्तव्यव्रतविशेषः । यथा,—
"ब्रह्मोवाच ।
भगवन्! पुरुषस्येह स्त्रियाश्च विरहादिकं ।
शोक-व्याधि-भयं दुःखं न भवेद्येन तद्वद ॥
भगवानुवाच ।
श्रावणस्य द्वितीयायां कृष्णायां मधुसूदनः ।
क्षीरार्णवे सलक्ष्मीकः सदा वसति केशवः ॥
तस्यां संपूज्य गोविन्दं सर्व्वान् कामान् समश्नुते ।
गो-भू-हिरण्य-दानादि सप्तकल्पशतानुगं ॥
अशून्यशयना नाम द्वितीया या प्रकीर्त्तिता
तस्यां सम्पूजयेद्विष्णुमेभिर्म्मन्त्रैर्व्विधानतः ॥
श्रीवत्सधारिन् श्रीकान्त श्रीधाम श्रीपतेऽव्यय ।
गार्हस्थ्यं मा प्रणाशं मे यातु धर्म्मार्थकामद ॥
अग्नयो मा प्रणश्यन्तु देवताः पुरुषोत्तम ।
पितरो मा प्रणश्यन्तु मत्तो दाम्पत्यभेदतः ॥
लक्ष्म्या वियुज्यते देवो न कदाचित् यथा भवान् ।
तथा कलत्रसम्बन्धो देव मा मे वियुज्यतु ॥
लक्ष्म्या न शून्यं वरद यथा ते शयनं सदा ।
शय्या ममाप्यशून्यास्तु तथैव मधुसूदन ॥
गीतवादित्रनिर्घोषं देवस्याग्रे तु कारयेत् ।
घण्टा भवेदशक्तस्य सर्व्ववाद्यमयी यतः ॥
एवं सम्पूज्य गोविन्दमश्नीयात्तैलवर्ज्जितं ।
नक्तमक्षारलवणं यावत्तत्स्याच्चतुष्टयं ॥
ततः प्रभाते संजाते लक्ष्मीपतिसमन्वितां ।
दीपान्नभाजनैर्युक्तां शय्यां दद्याद्विलक्षणां ॥
पादुकोपानहच्छत्रचामरासनसंयुतां ।
अभीष्टोपस्करैर्युक्तां शुक्लपुष्पाम्बरावृतां ॥
सोपधानकविश्रामां फलैर्नानाविधैर्युतां ।
तथाभरणधान्यैश्च यथाशक्त्या समन्वितां ॥
अव्यङ्गाङ्गाय विप्राय वैष्णवाय कुटुम्बिने ।
दातव्या वेदविदुषे न वकव्रतिने क्वचित् ॥
तत्रोपवेश्य दाम्पत्यमलंकृत्य विधानतः ।
पत्न्यास्तु भाजनं दद्यात् भक्ष्यभोज्यसमन्वितं ।
ब्राह्मणस्यापि सौवर्णीमुपस्करसमन्वितां ।
प्रतिमां देवदेवस्य सोदकुम्भां निवेदयेत् ॥
एवं यस्तु पुमान् कुर्य्यादशून्यशयनं हरेः ।
वित्तशाठ्येन रहितो नारायणपरायणः ॥
न तस्य पत्न्या विरहः कदाचिदपि जायते ।
नारी चाविधवा ब्रह्मन् यावच्चन्द्रार्कतारकं ॥
न विरूपं न शोकार्त्तं दाम्पत्यं जायते क्वचित् ।
न पुत्रपशुरत्नानि क्षयं यान्ति पितामह ॥
सप्तकल्पसहस्राणि सप्तकल्पशतानि च ।
कुर्व्वन्नशून्यशयनं विष्णुलोके महीयते" ॥
इति मत्स्यपुराणे अशून्यशयनव्रतं ६७ अध्यायः ॥

**अशृतं**, त्रि, (न शृतम् । नञ्तत्पुरुषः ।) अपक्वं । इति रत्नमाला ॥
"तण्डुलात् षोड़शगुणे शृते वाप्यशृते तथा ।
तोये पेयां पचेत्तावद्यावत् सिक्थकनिर्गमः" ॥
इति वैद्यकपरिभाषा ॥

**अशेषं**, त्रि, (नास्ति शेषो यस्येति ।) शेषरहितं । निःशेषं ॥ सर्व्वं । इत्यमरः ॥
("स्थानं प्राप्स्यस्यशेषाणां जगतामपि पूजितम्" ॥
"अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः" ॥
इति च विष्णुपुराणम् ॥ अशेषेण । यथा,—
"अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः" ।
इति कुमारे ।
"वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः" ॥
इति गीतायाम् ॥)

**अशोकं**, क्ली, पारदं । इति मेदिनी ॥ शोकरहिते त्रि ॥

**अशोकः**, पुं, (नास्ति शोको यस्मात् ।) स्वनामख्यातपुष्पवृक्षविशेषः । तत्पर्य्यायः । शोकनाशः २ विशोकः ३ वञ्जुलद्रुमः ४ वञ्जुलः ५ मधुपुष्पः ६ अपशोकः ७ कङ्केल्लिः ८ केलिकः ९ रक्तपल्लवः १० चित्रः ११ विचित्रः १२ कर्णपूरः १३ सुभगः १४ दोहली १५ ताम्रपल्लवः १६ रोगितरुः १७ हेमपुष्पः १८ रामा १९ वामाङ्घ्रिघातनः २० पिण्डीपुष्पः २१ नटः २२ पल्लवद्रुः २३ । अस्य गुणाः शीतलत्वं । हृद्यत्वं । पित्तदाहश्रमापहत्वं । गुल्मशूलोदराध्माननाशित्वं । कृमिकारकत्वञ्च । इति राजनिर्घण्टः ॥ अस्य पर्य्यायगुणाः ।
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केल्लिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥
अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः ।
दोषापचीतृषादाहकृमिशोषविषास्रजित्" ॥
इति भावप्रकाशः ॥
अस्य कलिकाभक्षणविधिरशोकाष्टमीशब्दे द्रष्टव्यः ॥ (योषितां सनूपुरचरणप्रहारेण अशोकानां पुष्पोद्गमो भवतीति कविसमयप्रसिद्धिः । यदुक्तम् ।
"पादाघातादशोकं विकसति वकुलं योषितामास्यमद्यैः" । इति साहित्यदर्पणे । अपरञ्च ।
"पादाहतः प्रमदया विकसत्यशोकः
शोकं जहाति वकुलो मुखशीधुसिक्तः" ।
अपरञ्च ।
"सनूपुररवेण स्त्रीचरणेनाभिताड़नम् ।
दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत्" ॥
कुमारसम्भवेऽपि ।
"असूत सद्यः कुसुमान्यशोकः" । इति ॥
"कुसुमं कृतदोहदस्त्वया
यदशोकोऽयमुदीरयिष्यति" ।
इति रघुवंशे ।
"अशोकवल्कलक्वाथं शृतं दुग्धं सुशीतलं ।
यथाबलं पिबेत्प्रातस्तीव्रासृग्दरनाशनं ॥"
इति वैद्यकचक्रपाणिसंग्रहः ॥
"अशोकवल्कलप्रस्थं तोयाढ़के विपाचितं ।
तेन पादावशेषेण जीरकेण तथैव च ॥
घृतप्रस्थं पचेदेतत्प्रक्षिप्य च तथापरं ।
तण्डुलाम्बुन्यजाक्षीरं प्रस्थं प्रस्थं पृथक् पृथक् ॥
केशराजरसस्यापि प्रस्थमेकं भिषग्वरः ।
जीवनीयैः पियालैश्च परूषसरलाञ्जनैः ॥
यष्ट्याह्वाशोकमूलञ्च मृद्वीका च शतावरी ।
तण्डुलीयकमूलञ्च कल्कैरेतैः पलार्द्धकैः ॥
शर्करायाः पलान्यष्टौ गर्भदत्त्वाशु चूर्णितं ।
पुष्यायोगेन तत्पीतं निहन्यात् सर्व्वदोषजं ॥
श्वेतं कृष्णं तथा नीलं प्रदरं हन्ति दुस्तरं ।
कुक्षिशूलं योनिशूलं पृष्ठशूलञ्च दारुणं ॥
मन्दाग्निमरुचिं पाण्डुं कृशतां श्वासकासिनां ।
अशोकघृतमेतत्तु विख्यातं स्त्रीगदेषु च" ॥ * ॥
अशोकघृतं ॥ * ॥
इति वैद्यकस्नेहमालिकायां ॥)

**अशोकः**, त्रि, (नास्ति शोको यस्येति वाच्यलिङ्गः ।) शोकरहितः । यथा,
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ॥
इति तिथ्यादितत्त्वं ॥ (स्वनामख्यातो दशरथस्य मन्त्री । उक्तं रामायणे ।
"धृष्टिर्जयन्तो विजयः सिद्धार्थोऽप्यर्थसाधकः ।
अशोको धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽभवत्" ॥
स्वनामख्यातो नृपतिश्च, यथा भारते ।
"अशोको नाम राजाभून्महावीर्य्योऽपराजितः ।
तस्मादवरजो यस्तु राजन्नश्वपतिः स्मृतः" ॥

**अशोकरोहिणी**, स्त्री, (अशोक इव रोहतीति । अशोक + रुह + णिनि + ङीप् ।) कटुरोहिणी । इत्यमरः ॥ कट्कीति भाषा । ("अशोकरोहिणी-वैजयन्ती-सुवर्चला-पुनर्नवा-वृश्चिकाली-ज्योतिष्मती-प्रभृतीनि समासेन तिक्तो वर्गः" ।
इति सुश्रुते ॥)

**अशोकषष्ठी**, स्त्री, (अशोका शोकादिरहिता या षष्ठी ।) चैत्रस्य शुक्ला षष्ठी । तस्यां षष्ठीपूजा यथा,
"चैत्रे मास्यसिते पक्षे षष्ठ्यां षष्ठीं समर्चयेत् ।
सुखाय पुत्रलाभाय शुक्लपक्षे तथैव च" ॥
इत्युत्तरकामाख्यातन्त्रे ११ पटलः ॥०॥
"प्रसूत्या द्वादशे मासि सम्पूज्यापत्यवृद्धये ।